रण्डः, त्रि, ( रम्+"अमन्तात् डः।" उणा० १। ११३। इति डः। ) अर्द्धचर्म्मावच्छिन्नावयवः। धूर्त्तः। इति संक्षिप्तसारोणादिवृत्तिः ॥

रण्डकः, पुं, (रण्ड इवेति। रण्ड+कन्। ) अफलवृक्षः। इति शब्दचन्द्रिका ॥

रण्डा, स्त्री, ( रमन्तेऽनेनेति। रम्+"अमन्तात् डः।" उणा० १। ११३। इति डः। टाप्। ) मूषिकपर्णी। इत्यमरः। २। ४। ८८॥ (यथा, "हिङ्गुलात् सम्भवं सूतं पालिधारसमर्द्दितम्। रण्डाप्रोथितगन्धञ्च तेनैव कज्जलीकृतम् ॥" इति वैद्यकरसेन्द्रसारसंग्रहे हृल्लोमनाथरसे॥) विधवा। राँड़ इति भाषा॥ यथा। तिष्ठते रण्डा विकर्म्मस्थेभ्यः स्वहृदयं यच्छतीत्यर्थः। इति संक्षिप्तसारे तिङन्तपादः ॥

रण्डाश्रमी [ न् ] पुं, ( रण्डो विफल आश्रमः सोऽस्यास्ति। रण्डाश्रम+इनिः। ) अष्टचत्वारिंशद्वत्सरोपरिभार्य्याविहीनः। यथा, भविष्यपुराणम्।
"चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि।
स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः॥"
इत्युद्वाहतत्त्वम् ॥

रतं, क्ली, ( रमणमिति। रम्+भावे क्तः। ) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, आर्य्यासप्तशत्याम्। ५४६।
"विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदम्।
तटतरुमिव मम हृदयं समूलमपि वेगतो हरति ॥"
तत्तु द्विविधम्। यथा, कामशास्त्रम्।
"बाह्यमाभ्यन्तरञ्चेति द्विविधं रतमुच्यते।
तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम् ॥
द्वितीयं सुरतं साक्षान्नानाकारैश्च कल्पितम्॥")
गुह्यम्। इति मेदिनी। ते, ४६॥ अनुरक्ते, त्रि॥ ( यथा, राजतरङ्गिण्याम्। ३। ५०५।
"तत्तुल्यगुणनिर्व्विश्वा तद्विपक्षरतौ रता ॥"
नियुक्तः। यथा, मनुः। २। २३५।
"यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्।
तेष्वेव नित्यं शुश्रूषां कुर्य्यात् प्रियहिते रतः ॥")

रतकीलः, पुं, (रते मैथुने कीलति परस्परं संबध्नातीति। कील्+कः। ) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥ ( रतस्य कीलः। ) सुरतकण्टकञ्च ॥

रतकूजितं, क्ली, ( रतस्य कूजितम्। ) मैथुनकालीनवाक्। तत्पर्य्यायः। मणितम् २। इति हेमचन्द्रः ॥

रतगुरुः, पुं, ( रतस्य रते वा गुरुः। ) पतिः। इति त्रिकाण्डशेषः। ६। ४४॥

रतज्वरः, पुं, ( रतेन ज्वरोऽस्य। ) काकः। इति त्रिकाण्डशेषः ॥

रततालो, [ न् ] पुं, ( रते तलति प्रतिष्ठां लभते इति। तल+णिनिः। ) विट्गः। इति शब्दमाला ॥

रतताली, स्त्री, (रते तालः प्रतिष्ठास्याः। ङीष्।) कुट्टनी। इति त्रिकाण्डशेषः ॥

रतनारीचः, पुं, ( रते नार्य्या चिनोतीति। चि+डः। ) नारीणां शीत्कारः। कुक्कुरः। स्मरः। इति मेदिनी। चे, २९॥ विट्गः। इति शब्दमाला ॥

रतनिधिः पुं, ( रतमेव निधिवत् गोप्यं यस्य। ) खञ्जनः। इति शब्दरत्नावली ॥

रतहिकं, क्ली, ( रतस्य अहरिव। शैषादिभाषितेति कप्। ) दिवसः। सुखस्नानम्। अष्टमङ्गलम्। इति मेदिनी। के, २१०॥

रतव्रणः, पुं, ( रतेन व्रणोऽस्य। रतं व्रण इव कष्टदायकं यस्येति वा। ) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतशायी, [ न् ] पुं (रतेन शेते तन्तूकरोत्यात्मानमिति। शी+णिनिः। ) कुक्कुरः। इति हेमचन्द्रः। ४। ३५६॥

रतहिण्डकः, पुं, ( रते रतार्थं वा हिण्डते इति। हिण्ड्+ण्वुल्। ) स्त्रीचौरः। इति त्रिकाण्डशेषः॥ लम्पटः। लोचा इति भाषा। तत्पर्य्यायः। विट्गः २ अलीकः ३ पल्लवः ४ द्रावकः ५ सुखङ्गः ६ चुम्बकः ७ लङ्गः ८ भुजङ्गः ९ नारीतरङ्गकः १० स्खलिकः ११ रतनारीचः १२ बन्धकः १३ रतताली १४ कटारः १५ कामी १६ खेटी १७ नागरः १८ दासीप्रियः १९. कुक्कुटकीटः २०। इति शब्दमाला ॥

रतान्दुकः, पुं, ( रतार्थमन्दुक इव। ) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतान्धी, स्त्री, ( रते अन्धीव। ) कुणभाटिः। इति त्रिकाण्डशेषः ॥

रतामर्द्दः, पुं, ( रते रतकाले आमर्द्दोऽस्य। ) कुक्कुरः। इति शब्दमाला ॥

रतायनी, स्त्री, (रतमेवायनं जीवनगतिर्य्यस्याः।) वेश्या। इति शब्दमाला ॥

रतार्थिनी, स्त्री, (रतमर्थयत इति। अर्थ+णिनिः। ङीप्। ) मैथुनाभिलाषिणी। इति हलायुधः॥

रतिः, स्त्री, ( रम्यतेऽनया इति। रम्+क्तिन्। ) कामदेवपत्नी॥ ( अस्याः नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६।
"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनीम्।
तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः ॥
तस्य पुंसो वामपार्श्वात् कामस्य कामिनी वरा।
बभूवातीव ललिता सर्व्वेषां मोहकारिणी ॥
रतिर्बभूव सर्व्वेषां तां दृष्ट्वा सस्मितां सतीम्।
रतीति तेन तन्नाम प्रवदन्ति मनीषिणः ॥" )
तस्या उत्पत्तिः नामकरणं कामपत्नीत्वञ्च यथा,
दक्ष उवाच।
"मद्देहजेयं कन्दर्प मद्रूपगुणशालिनी।
एनां गृह्णीष्व भार्य्यार्थे भवतः सदृशी गुणैः ॥
एषा तव महातेजाः सर्व्वदा सहचारिणी।
भविष्यति यथाकामं धर्म्मतो वशवर्त्तिनी ॥
मार्कण्डेय उवाच।
इत्युक्त्वा प्रददौ दक्षो देहस्वेदजलोद्भवाम्।
कन्दर्पायाग्रतः कृत्वा नाम कृत्वा रतीति ताम् ॥
तां वीक्ष्य मदनो रामां रत्याख्यां सुमनोहराम्।
आत्माशुगेन विद्धोऽसौ मुमोह रतिरञ्जितः ॥"
इति कालिकापुराणे ३ अध्यायः ॥
अनुरागः। ( यथा, भागवते। १। २। ८।
"नोत्पादयेद् यदि रतिं श्रम एव हि केवलम् ॥" )
रतम्। ( यथा, वृहत्संहितायाम्। ७४। १८।
"कामिनीं प्रथमयौवनान्वितां
मन्दवल्गुमृदुपीड़ितस्तनाम्।
उत्स्तनीं समवलम्ब्य या रतिः
सा न धातृभवनेऽस्ति मे मतिः ॥" )
गुह्यम्। इति मेदिनी। ते। ४६॥ ( अप्सरोविशेषः। यथा, महाभारते। १३। १९। ४५।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च।
एताश्चान्याश्च वै बह्व्यः प्रनृत्ताप्सरसः शुभाः ॥"
प्रीतिः। यथा, रामायणे। १। १८। २४।
"तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ॥"
'रतिः प्रीतिः।' इति तट्टीकायां रामानुजः ॥)
रतिबन्धा यथा,—
"न भवन्ति यदा नार्य्यस्तुष्टा बाह्यरते मताः।
नानाविधैस्तथा बन्धै रन्तव्याः कामिभिः स्त्रियः॥
पद्मासनो नागपाशो लतावेष्टोऽर्द्धसंपुटः।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः।
क्षुब्धो वै धेनुकश्चैवमुत्कण्ठस्तु ततः परम्।
सिंहासनो रतिनागो विद्याधरस्तु षोड़शः ॥"
इति रतिमञ्जरी ॥
एतेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥

रतिकुहरं, क्ली, ( रत्याः कुहरम्। ) योनिः। इति त्रिकाण्डशेषः ॥

रतिक्रिया, स्त्री, ( रत्याः क्रिया। ) मैथुनम्। तत्पर्य्यायः। संवेशनम् २। इति त्रिकाण्डशेषः॥ ( यथा, कामन्दकीये नीतिसारे। २। २५।
"अग्निहोत्रोपचरणं जीवनञ्च स्वकर्म्मभिः।
धर्म्मोऽयं गृहिणां काले पर्व्ववर्ज्जं रतिक्रिया ॥")

रतिगृहं, क्ली, ( रत्याः गृहम्। ) योनिः। इति त्रिकाण्डशेषः॥ रमणमन्दिरञ्च॥ (यथा, वृहत्संहितायाम्। ५३। १६।
"पञ्चाशन्मिश्रामभितं धान्यायुधवह्निरतिगृहाणाञ्च।
नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितंपरतः ॥")

रतिनागः, पुं, षोड़शरतिबन्धान्तर्गतपञ्चदशबन्धः। तस्य लक्षणं यथा,—
"पीड़येदूरुयुग्मेन कामुकं कामिनी यदि।
रतिनागः समाख्यातः कामिनीनां मनोरमः ॥"
इति रतिमञ्जरी ॥

रतिपतिः, पुं, ( रत्याः पतिः। ) कामदेवः। इत्यमरः॥ ( यथा, महागणपतिस्तोत्रे। १०।